# संस्कृत वार्ता:

दिनाङ्क : 06/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- नवदिल्ल्यां प्रधानमन्त्री नरेन्द्रमोदी वियतनाम देशस्य राष्ट्रपतिना तो लाम इत्यमुना सह सम्भाषणं विहितवान्। अनेकानि संधिपत्राणि च विनिमयीकृतानि।
- टी.वी.के. प्रमुखेन विजयेन तमिलनाडो: राज्यपालेन सह कृतं मेलनम्। बहूमतसंख्याभावेऽपि प्रशासननिर्माणस्य प्रकटिता प्रतिबद्धता ।
- असम-राज्यस्य मुख्यमन्त्री डॉ. हिमन्त-बिस्व-शर्मा अद्य स्वकीयं त्यागपत्रं समर्पितवान्। नूतन-प्रशासनस्य शपथ-ग्रहण-समारोहः प्रायः मई-मासस्य एकादश-दिनाङ्कानन्तरं भविष्यति।
- भारतीय-ऋतु-विज्ञान-विभागेन अद्य असम-बिहार-केरेलम्-तमिलनाडु-पुडुचेरी राज्येषु अतिवृष्टे: अनुमानं प्रकटितम् ।

---

<u>पीएम-वियतनाम राष्ट्रपति</u>

भारत-वियतनाम-देशयोर्मध्ये अद्य अङ्कीय-प्रौद्योगिकी, दुर्लभ-मृदा, भेषज-उत्पाद-विनियमनम्, सार्वजनिक-क्षेत्र-लेखापरीक्षा, अङ्कीय-दान-प्रणाली सहैव संस्कृति-पर्यटन-क्षेत्रेषु अनेकानि संधि-पत्राणि हस्ताक्षरितानि।

अद्य अपराह्णे नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः वियतनाम-देशस्य राष्ट्रपतिना 'तो लाम' महोदयेन सह सम्भाषणानंतरं संधिः अजायत । चर्चावधौ उभौ नेतारौ द्विपक्षीय-सम्बन्धानां सर्वेषु विषयेषु अथ च परस्पर-हितस्य क्षेत्रीय-वैश्विक-प्रकरणेषु विस्तृतां चर्चां कृतवन्तौ।

प्रधानमंत्री नरेंद्र मोदी स्वीये संदेशे अकथयत् यत् वियतनाम-देशस्य राष्ट्रपतित्वेन निर्वाचितः सन् एकमासाभ्यन्तरे एव राष्ट्रपति-तो-लाम-महोदयस्य इयं प्रथमा भारत-यात्रा सूचयति यत् सः भारत-वियतनाम-सम्बन्धाय प्राथमिकतां ददाति।

सः अवोचत् यत् न्यासं जीवन्तं स्थापयितुं भारतं वियतनाम-देशस्य प्राचीन-चम्पा-सभ्यतायाः 'माय सन' अथ च 'नहान ताऊ' मन्दिराणां जीर्णोद्धारं कुर्वत् अस्ति।

वित्तीय-सम्पर्कं वर्धयितुं अद्य उभाभ्यां देशाभ्यां केन्द्रीय-वित्तकोषयोः मध्ये सहयोगः सुदृढः कृतः। प्रधानमन्त्रिणा उक्तं यत् भारतस्य UPI तथा वियतनाम-देशस्य 'फास्ट पेमेन्ट इति प्रणाली' इत्येतौ अपि शीघ्रमेव सम्बद्धौ भविष्यतः। सः उक्तवान् यत् भारतस्य 'एक्ट ईस्ट' नीतेः तथा च 'विजन ओशन' इत्यस्य वियतनामः एकः मुख्यः आधारस्तम्भो वर्तते। अस्मिन्नेव क्रमे वियतनाम-देशस्य राष्ट्रपतिः तो लाम महोदयः अवदत् यत् - वियतनाम-देशः भारतेन सह पञ्चाशत्-वर्षाणां राजनैतिक-सम्बन्धानां तथा च दश-वर्षाणां 'व्यापक-रणनीतिक-संधिः इत्यस्य परिणामान् अतीव महत्त्वपूर्णान् मन्यते।

---------------------------------------------------

<u>तमिलनाडु</u>

तमिलनाडु-राज्ये तमिलाग-वेत्री-कज़गम (टी.वी.के.) इत्यस्य संस्थापकस्य सी. जोसेफ-विजयस्य नेतृत्वे नूतनं शासनं निर्मातुं राजनैतिक-वार्तालापः तीव्रः अभवत्, यतः तस्य दलस्य बहुमत-सङ्ख्या अष्टादशाधिक-एकशततः न्यूनाऽभवत्।

राज्यपालः राजेन्द्र-विश्वनाथ-आर्लेकरः अद्य अपराह्णे केरलात् चेन्नै-नगरं प्राप्स्यति। नियुक्तः मुख्यमन्त्री सी. जोसेफ-विजयः अद्य सायं राज्यपालेन सह मिलित्वा प्रशासनं निर्माणार्थं आवेदनपत्रं समर्पयिष्यति।

यावत् तमिलनाडु-राज्ये विजयस्य नेतृत्वे टी.वी.के.-सर्वकारस्य समर्थनार्थं दलानां मध्ये अनैक्यं विस्तृतं भवति, सहैव डी.एम्.के.-काङ्ग्रेस-दलयोः दीर्घकालीनं मैत्रीभावमपि सङ्कटग्रस्तम् अस्ति।

काङ्ग्रेस्-दलस्य, यस्य पञ्च विधायकाः सन्ति, टी.वी.के.-दलस्य समर्थनं कर्तुं निश्चिताः ते सन्ति । तमिलनाडुोः अधिकारिणः गिरीश-चोडङ्करस्य नेतृत्वे काङ्ग्रेस्-दलस्य विधानसभायाः नवनिर्वाचितानां सदस्यानां सभायाः अनन्तरं अयं निर्णयः कृतः।

प्रसारमाध्यमेन सह वार्तालापं कुर्वन् काङ्ग्रेस्-सदस्यः कार्ति-चिदम्बरम् अद्य अवदत् यत् काङ्ग्रेस्-दलं औपचारिकरूपेण विजयस्य टी.वी.के.-नेतृत्वस्य समर्थनं करिष्यति इति।

---------------------------------------------------

<u>सीएम-हिमंत बिस्वा</u>

असम-राज्यस्य मुख्यमन्त्री डॉ. हिमन्त-बिस्व-शर्मा अद्य गुवाहाटी-नगरस्य 'लोक-भवने' राज्यपाल-लक्ष्मण-प्रसाद-आचार्य-महोदयाय स्वकीयं त्यागपत्रं समर्पितवान्।

विधानसभा-निर्वाचन-प्रक्रियायाः समाप्त्यनन्तरं मुख्यमन्त्रिणा एतद् पदं त्यक्तम्। निर्वाचन-परिणामानां घोषणानन्तरं राज्ये नूतन-प्रशासनस्य निर्माणार्थम् एतेन मार्गः प्रशस्तः अभवत्।

त्यागपत्र-समर्पणानन्तरं प्रसारमाध्यमैः सह सम्भाषणं कुर्वन् डॉ. शर्मा अवदत् यत् राज्यपालेन मन्त्रिपरिषदः त्यागपत्रं स्वीकृतं सहैव हि वर्तमान-विधानसभा विखण्डिता। नूतन-प्रशासनस्य शपथ-ग्रहण-समारोहः प्रायः मई-मासस्य एकादश-दिनाङ्कानन्तरं भविष्यति। आगामी-मुख्यमन्त्रिणः विषये पृष्टे सति सः स्पष्टीकृतवान् यत् भाजपा-विधायक-दलं नेतृत्व-विषये निर्णयं विधास्यति, तदनन्तरमेव नूतन-मुख्यमन्त्री मन्त्रिपरिषदः निर्माणं भवेत्।

---------------------------------------------------

<u>ऋतु-विज्ञान</u>

भारतीय-ऋतु-विज्ञान-विभागेन अद्य अरुणाचल-प्रदेश, असम, मेघालय, बिहार, केरल, माहे, उप-हिमालयी-पश्चिम-बङ्गाल, सिक्किम, तमिळनाडु, पुदुच्चरीं समेत्य कारैकाल-क्षेत्रे कतिपयेषु स्थानेषु अतिवृष्टेः पूर्वानुमानं विहितम्।

ऋतु-विज्ञान-विभागेन सूचितं यत् अद्य अण्डमान-निकोबार-द्वीपसमूहेषु, असमे, मेघालये, पूर्व-राजस्थाने, हरियाणायां, चण्डीगढे सहैव दिल्ली-नगरे कतिपयेषु स्थानेषु विद्युत्-पातेन सह झञ्झावातस्य तीव्र-वायोः च सम्भावना अस्ति।

---------------------------------------------------

## पश्चिम बंगाल

पश्चिम-बङ्ग-राज्ये नूतन-भाजपेतिदलप्रशासनस्य शपथ-ग्रहण-समारोहः मई-मासस्य नवम-दिनाङ्के कोलकाता-नगरस्य 'ब्रिगेड-परेड क्षेत्रे आयोजितो भविष्यति।

राज्य-भाजपा-अध्यक्षः शमीक-भट्टाचार्यः वार्ताहरैः सह सम्भाषणे अवदत् यत् समारोहः प्रातः दश-वादने आरप्स्यते। अवधेयं यत् अस्मिन् कार्यक्रमे प्रधानमन्त्री नरेन्द्रमोदी, गृहमंत्री अमितशाहः अपि च भाजपा-शासित-राज्यानां अनेके मुख्यमन्त्रिणः उपस्थिताः भविष्यन्ति।

---------------------------------------------------

## आईपीएल

आईपीएल क्रिकेट्-क्रीडायां अद्य सायंकाले सनराइजर्स हैदराबाद, पञ्जाब-किङ्ग्स दलयो: मध्ये क्रीडा भविष्यति। सायं सार्ध सप्तवादने क्रीडा आरप्स्यते। ह्य: दिल्ल्या: अरुण जेटली-क्रीडांगणे चेन्नई-सुपरकिङ्ग्स दलेन दिल्ली-कैपिटल्स दलम् अष्ट-स्तोभै: पराजितम् ।

।। इति वार्ता: ।।